प्रवेश सं० १८२३५ विषय: पुराणेतिहासम् क्रम सं०

नाम भागवतम् (प्रथमस्कन्धीयाद्यपद्यत्रयमात्रस्य टीका) सटीकम् ग्रन्थकार टी० मधुसूदन.

पत्र सं० १-१७

अक्षर सं० (पंक्तौ) ४० पंक्ति सं० (पृष्ठे) १४

श्लोक सं०

आकार: ११.३" × ५.५" लिपि: दे.ना. आधार: का.

वि० विवरणम् पूर्ण

14435

पी० एस० यू० पी०--७७ एम० सी० ई०--१९५१--५०,०००

न० ३८५३.

Indira Gandhi National
Centre for the Arts

१ श्रीगणेशायनमः॥श्रीकृष्णंपरमंतत्त्वंनत्वातस्यप्रसादतः श्रीभागवतपद्यानांकश्चिद्भावःप्रकाश्यते१ अत्र
हिनिमिरमायुःसर्वेशःसत्प्रसंगैर्बहुविधपरितापैः क्षीयतेव्यर्थमेव हरिचरितसुधाभिःसिच्यमानंतदेतत्स्वरा
मपिसफलंस्यादित्ययंमेश्रमोत्र २ कृत्स्नग्रंथतात्पर्यविषयीभूतमर्थंदर्शयन्भगवान्बादरायणि
स्तमेवध्येयत्वेनोपक्षिपन्मंगलमाचरति॥ जन्माद्यस्येति॥जन्माद्यस्ययतोऽन्वयादितरतश्चार्थेष्वभिज्ञ
:स्वराट् तेनेब्रह्महृदायआदिकवयेमुह्यंतियत्सूरयः तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधा
म्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि १ तंपरंसत्यंवयंधीमहीतिसंबंधः सत्यमबाध्यं तत्रकिंचिद्व्य
वहारमात्राबाध्यं तद्व्यावर्तनायाह परमिति परमार्थसत्यमत्यंताबाध्यमित्यर्थः तथाचश्रुतिः सत्यस्य
सत्यमिति प्राणावैसत्यंतेषामेषसत्यमिति प्राणशब्दोदितानांस्थूलसूक्ष्मभूतानांव्यवहारतःसत्या
नामधिष्ठानभूतंपरमार्थसत्यमात्मानंदर्शयति एवंसत्यंज्ञानमनंतंब्रह्मऐतदात्म्यमिदंसर्वंसआ
त्मा तत्त्वमसीत्यादिश्रुतिरपिब्रह्मात्मशब्दोदितंपरंतत्त्वमबाध्यंदर्शयति सर्वभ्रमाधिष्ठानत्वात्स रामः
र्वबाधावधित्वाच्चपरमार्थसत्यत्वं नहिनिरधिष्ठानोभ्रमोस्तिनचानिरवधिर्बाधः तत्रसर्वभ्रमाधि १

ष्ठानत्वंजन्माद्यस्ययतइत्यादिनादर्शितं सर्वबाधावधित्वंचतेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गो
मृषेत्यादिना तंपरंसत्यंसर्वाधिष्ठानसन्मात्रमखंडवाक्यार्थभूतंश्रुत्वामत्वाचवयंमुमुक्षवोध्या
येमनिदिध्यासेम ध्यानमत्रनिदिध्यासनरूपमेवाभिप्रेतं नतूपासनं निदिध्यासनंहिवस्तुस्वरू
पापेक्षप्रत्ययानंतरितशाब्दज्ञानसंततिरूपं आत्मावाअरेद्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासि
तव्यइतिश्रुत्या ततस्तुतंपश्यतेनिष्कलंध्यायमानइत्यादिश्रुत्याचात्मसाक्षात्कारसाधनत्वेन
विहितं उपासनंतुवस्तुस्वरूपानपेक्षंपुरुषेच्छामात्रतंत्रंमानसक्रियाप्रवाहरूपं यथायस्यैदेवतायै
हविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन्नित्यादि उक्तंचवस्तुस्वरूपानपेक्षमभिमतदविरोधि किं
चित्तद्विरोध्यपि यथावाचंधेनुमुपासीतेत्यादि द्विविधमप्युपासनंश्रुत्याब्रह्मणिनिषिद्धं तदेव
ब्रह्मत्वंविद्धिनेदंयदिदमुपासते श्रुद्वगोचरायाश्चतेरूपनिषन्मात्रकारणत्वात् तंत्वौपनिषदं
मितिश्रुतेः तस्याएवचावर्त्यमानायानिदिध्यासनरूपत्वाद्युक्तंश्रुद्वगोचरत्वं एतावन्मात्रप
र्यवसानाच्चसर्वसाधनविधीनांमहीत्युक्तं एतस्यचमंगलत्वंसर्वदासर्वकार्येषुनास्तितेषामम

धि

Indira Gandhi National
Centre for the Arts

२

गत्वे येषांहृदिस्थोभगवान्मंगलायतनंहरिरित्यादिशास्त्रसिद्धं एवंभूतस्यब्रह्मणोनिदिध्यास
मानस्यपरमार्थसत्यतामुपपादयितुंतस्यलक्षणमाह जन्माद्यस्ययतइत्यादिना अस्यप्रत्य
क्षादिसकलप्रमाणसंनिधापितस्यजगतोजन्मादिजन्मस्थितिभंगंयतोभवतीति तंसत्यंधीम
हीतिसंबंधः तथाचश्रुतिः यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयन्त्यभिसं
विशंतीत्याद्या आनंदोब्रह्मेतिव्यजानात् आनंदाद्ध्येवखल्विमानिभूतानिजायंते इत्याद्याचजग
ज्जन्मस्थितिलयकारणतांब्रह्मणोदर्शयति यतइतिप्रकृतौपंचमीजनिकर्तुःप्रकृतिरितिपाणि
निस्मरणात् जन्मादीतितद्गु णसंविज्ञानोबहुव्रीहिः सर्वादीनिसर्वनामानीतिवत् जन्मनश्च
आदित्वंश्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षंचननु असद्वाइदमग्रआसीदितिश्रुतेः शून्यमेवज
गत्कारणमस्त्वित्याह अन्वयादिति इदंसदिदंसदितिसद्रूपस्यैवकारणस्यकार्येष्वनुस्यू
तत्वात् इतरतश्चअसतोऽनन्वयात् शून्यमिदमितिप्रतीत्यभावात् कुतस्तुखलुसोम्यैवं रामः
स्यादितिहोवाचकथमसतःसज्जायेतेतिवाक्येनासतःकारणताप्रतिषेधाच्च सद्रूपंब्रह्मैवजगदुपा २

दानमित्यर्थः सदेवसोम्येदमग्रआसीदितिश्रुतिवाक्यान्वयात् इतरतश्चासद्वाइदमग्रआसीदित्यस
तःसत्तान्वयाच्चेतिवा तथाचासत्पदंसूक्ष्मत्वेनगौणमाश्रित्यास्त्येवयोजनीयं एतच्चसमाकर्षादिति
समन्वयाध्यायेचतुर्थपादेचतुर्थाधिकरणेप्रकृतस्यैवसत्यज्ञानादिलक्षणस्याकर्षणंप्रतिपादन
माकर्षः सम्यग्रूपमसत्त्वादिराहित्यंसूत्रेणव्याख्यातं इतरतइत्यत्रचकारादसतोऽन्वयलाभः अथवा
कार्यान्वयात् ब्रह्मकारणमित्युक्तेःकार्यान्वयात् कार्यविनाशेतस्यविनाशमाशंक्योक्तमितरत
श्चेति तथाहि घटनाशेपितदन्वितामृत्त्वविनश्यति तत्कस्यहेतोर्घटभिन्नेशरावादौतस्यान्व
यात् एवंसदपिइतरतः इतरत्रकार्यांतरेतदुपलंभान्वयादित्यर्थः वाक्यार्थानुपपत्त्यादिदोषा
च्चनासतोजगत्कारणतेत्याह अर्थेष्वभिज्ञइति नहिसतोऽप्यर्थानविदित्वाकश्चिद्रचितुंशक्य
तेकिंपुनरवस्तुनेतिभावः तथाचश्रुतिः यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः तस्मादेतद्ब्रह्म
नामरूपंचजायतेइति सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयंतदैक्षतबहुस्यांप्रजायेयेत्याद्या
चस्वरूपसाधनप्रयोजनादिविज्ञानवतएवजगत्कारणत्वंदर्शयति अभितःसर्वप्रकारेण

Indira Gandhi National
Centre for the Arts

३ सामान्यतो विशेषतश्च सर्वं जानातीत्यभिज्ञः सर्वज्ञः सर्वविदिति पदद्वयार्थो दर्शितः अर्थो नाभि
ज्ञ इति दर्शिते अर्थेष्विति सप्तमी सर्वज्ञैकरूपे वा ह्यन्त्याकल्पितस्वरूपाविषयेनेति सूचयति अ
थवान्वयादितरतश्चार्थेष्विति पूर्वेणैव संबंधः एवं च सर्वज्ञत्वोपादानत्वेन परमाणुकारणवा
दः प्रधानकारणवादश्च निराकृतः ननु माभूत्कारणता परमाणूनां प्रधानस्य भविष्य
ति सत्वपरिणामेन सार्वज्ञ्यसंभवात् ब्रह्मणश्च निर्धर्मकत्वेन सर्वज्ञानकर्तृत्वादित्यत
आह स्वराडिति स्वयमेव राजते प्रकाशत इति स्वराट् अन्यानपेक्षप्रकाशरूप इ
त्यर्थः तथा च सविता प्रकाशत इत्यादिवत् कर्तृत्वोपचारिकत्वेन सर्वविषयज्ञा
नरूपत्वस्य विवक्षितत्वात् न प्रधानस्याचेतनस्य कारणताप्रसंग इत्यर्थः एवं
चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञासमर्थिता भवति अन्यथा प्रधानविज्ञानेन तत्कार्य
ज्ञानसंभवेपि तदकार्याणां पुरुषाणां ज्ञानसंभवात् ब्रह्मणि विदिते तु पुरुषाणां स्वत एव प्र२
तद्रूपत्वादितरेषां च तत्र कल्पितत्वेन तद्व्यतिरेकाद्येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञा रामः

३

तमित्यादिश्रुत्या कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्याद्युपा आत्मनि खल्वरे दृष्टे श्रुते
मते विज्ञाते इदं सर्वं विदितमित्याद्यथा च प्रतिपादितैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः ननु ब्रह्म
कारणत्वेप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा नोपपद्यते वेदस्यापौरुषेयत्वेन स्वातंत्र्याभ्युपगमात्
तस्य ब्रह्मकार्यत्वे पौरुषेयत्वेनाप्रामाण्यप्रसंगात् किंबलाद्ब्रह्मकारणतापि व्यवस्थाप्येतत
स्मात्संकोचितायां प्रतिज्ञायां स्वकार्यापेक्षया प्रधानमपि लब्धप्रसरमित्याशंक्याह तेन इत्यादि
ब्रह्मवेदं यस्तेने विस्तारितवान् श्वासप्रश्वासादिवल्लीलयाविर्भावितवान् तथा च श्रुतिः अस्य
महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्याद्या वेदस्यापि ब्रह्मोपादानतां दर्शयति न च
ब्रह्मकार्यत्वे सति तस्य पौरुषेयत्वं पुरुषमात्रजन्यत्वेपि पौरुषेयत्वे वर्णानां नित्यत्वेप्यानुपूर्वी
विशेषस्य पुरुषजन्यत्वान्मीमांसकमतस्यापि वेदाप्रामाण्यप्रसंगः वर्णनित्यतामात्रेणैव चापौरु
षेयत्वव्यवस्थापने लौकिकवाक्यस्यापि तत्प्रसंगः तस्मान्मानांतरेणार्थमुपलभ्य रचितत्वं पौरु
षेयत्वं मानापेक्षत्वं च लक्षणाप्रामाण्यप्रयोजकं तच्च न वेदे वेदार्थस्य मानांतरागोचरत्वात् इदमे

Indira Gandhi National
Centre for the Arts

५ वस्तुन्यानिश्वसितदृष्टांतेनदर्शितं यथा हि निश्वासः पुरुषाज्जायमानोपि न पुरुषचिकीर्षाज
न्यः सुषुप्तावपि दर्शनात् एवं वेदो ब्रह्मणः सकाशाज्जायमानोपि न पुरुषचिकीर्षाजन्यः तद
र्थस्य वेदातिरिक्तमानाविषयत्वात् तथा च वेदतदर्थज्ञानयोस्तुल्यकालत्वान्न ब्रह्मणः
सार्वज्ञ्यव्याघातो न वा वेदस्य पौरुषेयत्वं एवं च सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानसं
कोचनीया बाधकाभावात् अत्र चेदृशमनुमानं सूचितं वेदनिष्ठसर्वार्थप्रकाशनश
क्तिः सदुपादाननिष्ठा कार्यगतप्रकाशनशक्तित्वात् वन्ह्युपादानकदीपगतप्रकाश
नशक्तिवदिति अतो वेदोपादानत्वेपि ब्रह्मणः सार्वज्ञ्यसिद्धिः केचित् हिरण्यगर्भ
एव वेदपूर्वकाज्जगत्कारणं चेत्याहुस्तान्निराकरोति हृदाय आदिकवय इति आदिक
वि हिरण्यगर्भस्तस्मै हृदा संकल्पो ब्रह्म तेने अंतःकरणसूक्ष्मपंचैहाभूतकार्यमुत्पाद्य म३
तदुपाधेर्हिरण्यगर्भस्य वेदतदर्थज्ञानं कारितवानित्यर्थः तथा च श्रुतिः यो ब्रह्माणं वि रामः
दधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणम् ५

हं प्रपद्ये इति हिरण्यगर्भ तद्वैराविर्भावयोः परमेश्वराधीनतां दर्शयति तदपि तद्दाम न सेवनेने न तु
मुखेनाध्यापितामानि निवा अनेन सर्वांतर्यामित्वं दर्शितं तथा च श्रुतिः यः सर्वेषु भूतेषु तिष्ठ
न् सर्वभूतेभ्योंतरो यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यं
तरो यमयत्येषत आत्मांतर्याम्यमृत इत्याद्या सर्वांतर्यामित्वेन परमात्मानं प्रतिपादयति न
नु दृष्टश्रुतीनां ब्रह्मणि प्रामाण्यं न संभवति ब्रह्मणः सिद्धत्वेन मानांतरायोग्यत्वात् अतत
स्वरूपं चैतन्यस्यैव मानांतरत्वात् तथा च तत्संवादेन श्रुतीनां नाज्ञातज्ञापकत्वलक्षणं प्रा
माण्यं विसंवादे तु बाधितविषयत्वात् सुतरामप्रामाण्यं तथा च प्रधानपरमाणवादिकारण
ताबोधकमनुमानं लब्धावकाशं भविष्यतीत्याह मुह्यंति यत्सूरय इति यत् यत्र यस्मिन् विषये
अखंडानंदाद्वयस्वरूपचिन्मात्रलक्षणे सूरयस्तार्किकादयो मुह्यंति मोहमज्ञानमनुभवंति मो
हो द्विविधः आवरणरूपो विक्षेपरूपश्च आवरणरूपोपि असत्त्वावरणरूपो अभानावरण
रूपश्चेति द्विविधः तत्र नास्ति शुद्धं ब्रह्म न भासत इत्येवेति द्विविधोपि मोहो वेदांतशास्त्रविचारविमुखे

Indira Gandhi National
Centre for the Arts

५ रनुभूयते वेदांतशास्त्रविचारपराणां तु परोक्षत्वेनासत्त्वावरणनिवृत्तावप्यभानावरणमनुव
र्तत एव नास्ति ब्रह्मेति प्रतीत्यनुदयेपि मम न भाति ब्रह्मेति तेषां प्रतीतेः अत एव ते तदभानावरण
निवर्तकस्य साक्षात्कारस्य साधनान्यनुतिष्ठंति एवं च विक्षेपोप्यावरणकार्यभ्रमविशेषरूपः
प्रत्यक्ष एव यतो जीवाभिन्न एवेश्वरो जगतो निमित्तकारणमात्रमेवेति तार्किकवैशेषिकपातं
जलपाशुपतादयो व्यवहरंति सांख्यमीमांसकादयस्तु जगन्निमित्तकारणत्वेनापीश्वरमुप
यंति किंतु प्रधानपरमाण्वाद्येव तेन रूपेणोपास्यमित्याहुः तस्माद्ब्रह्मविषयकमोहस्याप
रोक्षत्वात्स्वरूपचैतन्यस्य तत्साधकत्वेन तदनिवर्तकत्वात्तन्निवर्तकवस्तुत्पादनेन वेदांता
नां प्रामाण्यमव्याहतमेव सिद्धत्वेपि च ब्रह्मणो मानांतरायोग्यत्वेन रूपादिहीनत्वेन व्युत्पादितं
भाष्यकारप्रभृतिभिः एवं पूर्वार्द्धेन तत्पदवाक्यार्थमुक्त्वापरार्द्धेन तद्ब्रह्मस्वरूपं वक्तुमारभते अ
ध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति न्यायेन तेजोवारीत्यादिना यत्र ब्रह्मणि त्रयाणां रामः
तेजोवन्नानां सर्गः त्रिसर्गः समष्ट्याभिव्येव शुक्तौ रजतवत् छांदोग्ये षष्ठप्रकरणे त्रयाणां तेजो ५

वन्नानां साक्षात्पठितत्वात् त्रिसर्ग इत्युक्तं वियदधिकरणन्यायेन तु पंचभूतसर्ग इति द्रष्टव्यं जगन्मि
थ्यात्वे दृष्टांतमाह तेजोवारिमृदां यथा विनिमय इति विनिमयो व्यत्ययः व्यत्यासः व्यामिश्रीभावो
ऽन्यस्मिन्नन्यावभासरूप इति यावत् तथा च श्रुतिः यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां य
त्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्या
दिना कृत्स्नस्यापि विकारस्यानृततां दर्शयति नह्यारंभवादो नापि परिणामवादो वा संभवति तथा
हि परमाणुः परमाण्वंतरेण संयुज्यमानो द्व्यणुकमारभत इत्युपेयते तत्र द्व्यणुकासमवायि
कारणीभूतः संयोगः परमाण्वोः कार्त्स्न्येन वा समवैयादेशेन वा आद्ये प्रथिमानुपपत्तिः द्वि
तीये सावयवत्वापत्तिः एवं परिणामोपि प्रधानस्य कार्त्स्न्येन वा एकदेशेन वा आद्ये कारणवि
नाशापत्तिः द्वितीये सावयवत्वापत्तिः न चेष्टमेवैतत् सावयवत्वे तस्यापि जन्यत्वेन मूलकार
णत्वानुपपत्तिः एवं कार्यमपि कारणव्यापारात् प्रागसत्सद्वा आद्ये कथं कार्यकारणभावग्र
हः नहि खपुष्पेन समं कस्यचित्संबंधो गृह्यते उत्पद्यते घट इव प्रतियोगित्वेनासतोपि कार्य

Indira Gandhi National Centre for the Arts

त्वं भविष्यतीति चेत् हंत प्रागभावप्रतियोगित्वं निराश्रयं साश्रयं वा आद्ये शशविषाणतुल्य
त्वाद्द्वितीयेसत्कार्यवादापत्तिः प्रागभावप्रतियोगित्वाश्रयत्वेनैव कार्यसत्वांगीकारात्
न च सत्कार्यवादोपि घटते कारकव्यापारवैयर्थ्यापातात् आविर्भावतिरोभावयोरपि
सदसत्वविकल्पग्रासात् तस्मात्सदसद्विलक्षणत्वेनानिर्वचनीयत्वेनैव कार्यकारण
योरिति विवर्तवादो वशिष्यते तथा चाविद्यावशात् सद्वैलक्षण्यो द्वैताभासो मिथ्ये
त्यर्थः नन्वविद्याकार्याणामसत्यत्वेपि अविद्यायाः सत्वमस्तु अनादिभावत्वात्
ब्रह्मवत् कल्पकशून्यत्वाच्च न हि द्वैतप्रपंचकल्पनाहेतोरविद्यायाः कल्पकांतरम
स्ति स्वस्या एव कल्पकत्वे आत्माश्रयत्वात् अविद्यांतराभ्युपगमे चानवस्थानात् त
थैकविज्ञानेन सर्वविज्ञानव्याघातो निर्मोक्षापत्तिश्चेत्यत आह धाम्ना स्वेन सदा निर
स्तकुहकमिति निरस्तं नित्यनिवृत्तं कुहकं कपटम विद्याख्यं यस्मिन् ततत्तथा तत्र हेतुः स्वे
न धाम्नेति अखंडानंदाद्वितीयचैतन्यरूपत्वादित्यर्थः तथा च श्रुतिः सदेव सोम्येदमग्र

रामः

आसीदेकमेवाद्वितीयमित्यादिरन्यथानुपपद्यमानैरेकमेवाद्वितीयशब्दैरखंडमेव वस्तु प्रति
पादयति सा हश्य संबंधोनुपपत्त्या कल्पितत्वेनैवाविद्याया श्चैतन्याभास्यत्वनियमाच्च ए
कस्या एव च स्वपरसाधारणकल्पनामूलत्वान्नाविद्यांतराभ्युपगमदोषः उत्पत्त्यंगीकारेण
ज्ञप्तेश्च नित्यत्वेन नात्माश्रयदोषः अनादिभावत्वं चात्मनो नित्यत्वे प्रयोजकं न भवति किंतु
परमार्थसत्यत्वे अविद्यायाश्च सदसद्विलक्षणत्वात् ज्ञाननिवर्त्यत्वोपपत्तिः तथा च मा
यातत्कार्यहीनः परमात्मा तत्पदलक्ष्यो दर्शितः एतेनैव त्वंपदलक्ष्योपि दर्शितः तस्यापि
मायातत्कार्यशरीरादिहीनत्वात् जाग्रत्स्वप्नसुषुप्तिसाक्षिणस्तद्धर्माभावात् एवं च प
दार्थज्ञानपूर्वकवाक्यार्थबोधे सति तदावृत्तिरूपं निदिध्यासनमुपपन्नं अथ जन्मा
द्यस्य यत इत्यनेनानंदरूपत्वे दर्शिते आनंदाद्ध्येव खल्विमानि भूतानि जायंते इत्यादिश्रु
तेः अन्वयादित्यनेन सद्रूपत्वं नित्यत्वं विभुत्वं च सर्वदेशकालान्वयबोधनात् स्वराडि
त्यनेन स्वप्रकाशज्ञानरूपत्वं धाम्ना स्वेन निरस्तकुहकमित्यनेन परमार्थमिति सत्यं ज्ञा

६ नमनंतंवृसविज्ञानंमानंदंवृह्मेत्यादिवाक्यार्थोदर्शितः अथत्वंपदार्थोपिशक्तितःनेन
श्लोकेनदर्शयितुंश्लेषालंकारस्यात्यंतचारुत्वात् तथाहि योजीवअस्मदेहेंद्रियादेर्जन्मा
दिविकारजातंअन्वयात्अनुगतवान् अविद्ययात्मन्यारोपितत्वात् तंपरंसत्यं
धीमहीतिसंवंधः अस्यकीदृशस्ययतःगछतः सर्वदापरिणममानस्येत्यर्थः जन्मादि
गछतइतिवा ननुजातोदेवदत्तोमृतोदेवदत्तइतिप्रतीतेः तद्यथाग्नेः क्षुद्राविस्फुलिं
गाव्युच्चरंत्येवमेवास्मदात्मनः सर्वएतआत्मानोव्युच्चरंतीतिजन्मश्रुतेश्चस्वतएव
जन्मादिमान् जीवस्तुनेत्याह उतरतश्चेतिजन्माद्ययोग्यत्वादित्यर्थः तथाचश्रु
तिः नजायतेम्रियतेवाविपश्चिन्नायंकुतश्चिन्नवभूवकश्चित् अजोनित्यःशा
श्वतोयंपुराणोनहन्यतेहन्यमानेशरीरेइत्याद्याश्रुतिःस्मृतिश्चभगवद्गीताजीव
स्यजन्मविनाशौवारयति कृतहान्यकृताभ्यागमादिदोषप्रसंगाद्देपाद्युत्पत्ति रा.भः
मात्रेणैवव्युच्चरंतीत्यादिश्रुत्युपपत्तेस्तद्गुणसारत्वादित्यादिन्यायाच्चेतिचकारार्थः ७

देहमिंद्रियंमनःप्राणंचकेचिदात्मत्वेनप्रतिपन्नास्तान्निराकरोति अर्थेष्वभिज्ञइति नहिभो
तिकानांदेहेंद्रियप्राणमनसांज्ञातृत्वंसंभवति घटादावपितत्प्रसंगात् एतेषांचानित्यत्वा
त् आत्मनित्यत्वस्यचव्यवस्थापितत्वात् एतेनविभुत्वमपिव्याख्यातंनित्यत्वंहिमध्य
मपरिमाणत्वेनुपपद्यमानंपरमाणुत्वेवापरममहत्वेवाव्यवतिष्ठेत् नत्रपरमाणुत्वेसक
लशरीरव्यापिसुखदुःखानुपलंभप्रसंगात् सकलदेहव्यापिकार्योपलब्धेश्चपरममह
त्वएवनित्यत्वंव्यवतिष्ठते एतेनदेहाद्यतिरिक्तोपिदेहपरिमाणएवात्मेतिसपणकपक्षो
निरस्तः अस्तुतर्हिदेहेंद्रियातिरिक्तोविभुरेवात्माज्ञानाश्रयोनतुज्ञानरूपइतिमतंतत्राह स्व
राडितिस्वयमेवराजतइतिस्वराट्स्वप्रकाशज्ञानरूपइत्यर्थः अत्रायंपुरुषःस्वयंज्यो
तिर्भवतीत्यादिश्रुतेः संदेहविपर्ययाद्यविषयत्वेनसदाभासमानत्वात् स्वज्ञन्यज्ञान
विषयत्वेचकर्तृकर्मविरोधात् ज्ञातएवेतिन्यायात् ज्ञानरूपएवात्मेत्यर्थः अविरोधा
ध्यायेतृतीयपादेद्वादशाधिकरणेजोनित्यचैतन्यरूपोयमात्माअतएवउत्पत्त्यसंभ

Indira Gandhi National
Centre for the Arts

८

वादेव परमात्मवदिति न्यायादित्यर्थः ननु जीवस्य स्वप्रकाशज्ञानरूपत्वे जन्मादिशून्यत्वे
च ब्रह्मणो भेदकाभावात् स्वत एव च ब्रह्माभिन्नत्वे शास्त्रारंभो निरर्थकः ब्रह्मावबोधस्य स
र्वदा विद्यमानत्वादित्यत आह तेनेव ब्रह्म हृदा य आदिकवय इति हृदा मनसा उपाधिना
तादात्म्यापन्नः सन् अब्रह्मवद् ब्रह्मविपरीतं कर्तृत्वभोक्तृत्वादिलक्षणं संसारं संचरणरू
पं विस्तारितवान् तथा च श्रुतिः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलाय
यतीव स धीः स्वप्नो भूत्वेत्याद्या धीः संबंधात् संसारिणोपि संसारितां दर्शयति तथा
च तन्निवृत्तये ब्रह्मात्मनोपदेशो युक्त इत्यर्थः संसारस्य मोक्षहेतुतां दर्शयति आदिकव
य इति आदिभूतं यत्कं सुखं ब्रह्मानंदरूपो मोक्ष इत्यर्थः तस्य वयः प्राप्तिस्तदर्थं अपव
र्गतावितिस्मरणात् निमित्तात्कर्मसंयोगे चेपसप्तमी चर्मणि द्वीपिनं हंतीतिवत् नहि
संसाराभावे श्रवणमननादिसाधनानुष्ठानं संभवति न च तदभावे तत्त्वज्ञानोदयः न च त रामः
मंतरेणानाद्यविद्यानिवृत्तिरिति मोक्षार्थमेव संसारं विस्तारितवानित्यर्थः तथा च श्रुतिः रू ८

---

पं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इंद्रो मायाभिः पुरुरूप ईयते इति च ब्रह्म वा इ
दमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति च संसारद्वारा अविद्या
निवृत्तिरूपं मोक्षं दर्शयति ननु तर्हि भवतु स्वप्रकाशज्ञानरूप आत्मा किंतु नानंदरूपः प्रतिश
रीरं भिन्नश्चेति सांख्यमतं तत्राह मुह्यंति यत्सूरय इति यत् यत्र यस्मिन् जीवस्वरूपे सूरयः ता
र्किकाद्यापेक्षया सुधियोपि सांख्या मुह्यंति भ्राम्यंति शुद्धस्वरूपं जानाना अपि आनंदरू
पत्वं प्रतिदेहमेकत्वं ब्रह्माभिन्नत्वं चाजानंतः तथा च श्रुतयः एष एव परम आनंद इति ए
को देवः सर्वभूतेषु गूढ इति अयमात्मा ब्रह्मेति तादृग्रूपतां जीवस्य बोधयंति तदेतत्प्रे
यः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात् सर्वस्मादंतरतरं यदयमात्मेति श्रुत्यंतराच्च परमप्रेमास्पदत्वादानं
दरूपत्वं नानात्वे भोगव्यवस्थानुपपत्तेश्च प्रतिदेहमेकत्वं नहि विभूनामात्मनां सर्वदेह
संबंधित्वाविशेषे कर्मादिकमपि भोगनियामकं भवितुमर्हति अविशेषात् एकात्मवा
दे तु तत्तदंतःकरणावच्छिन्नप्रदेशानां भिन्नत्वादुपपद्यत एवं व्यवस्था देहभेदादेव

Indira Gandhi National Centre for the Arts

९ प्रतिसंधानाभावः एवं च भेदकमन्यत्वाद्भूमाभिन्नत्वमपि सिद्धं लसरोक्यात् एवं चत्वंप
दवाच्यार्थं पूर्वार्द्धेन प्रतिपाद्य तत्त्वस्य मुत्तरार्द्धेन वक्तुमध्यारोपापवादन्यायेनारभते तेजो
वारिमृदां यथा विनिमय इत्यादिना यत्रेत्यात्मनि त्रयाणां स्थूलसूक्ष्मकारणोपाधीनां
जाग्रत्स्वप्नसुषुप्त्यवस्थाहेतूनां सर्गः संसर्गो मिथ्यैव न तु परमार्थतः स प्रपन्नत्र किंचित्पश्य
त्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इत्यादिश्रुतिभ्यः सास्य सासिद्धर्मानुपपत्तेः भा
स्यवदादेर्भासकदीपत्वादिधर्मत्वादर्शनात् मिथ्यात्वे दृष्टांतः तेजो वारीति वारिणि करका
रूपे मृद्बुद्धिः एवं काचादिरूपायां मृदि तेजोबुद्धिरित्युदाहार्य्यं तथा चेदमनुमानं सूचितं आ
त्मनि जाग्रदादिबुद्धिर्मृषा तदभाववति तद्बुद्धित्वात् तेजसि वारिबुद्धिवत् तदभाववत्त्वं चा
त्मनः श्रुतिस्मृतिन्यायैर्निश्चितमिति नासिद्धिः एवं लसरोकेन ब्रह्माभिन्नत्वं दर्शयति
धाम्ना स्वेन सदा निरस्तकुहकमिति तदेवं तत्पदार्थत्वंपदार्थतदैक्यकथनद्वारेण शास्त्र रामः
स्यविषयो दर्शितः श्रवणमननयोस्तृतीयं च निदिध्यासनमिह प्रतिपाद्यते मनननिदि ९

ध्यासनवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात् चतुर्लक्षणी
मीमांसारूपत्वं चास्य सूचितं तथाहि पूर्वार्द्धेन जन्माद्यस्य यत इति न्यायः साक्षादेव दर्शि १०
तः अन्वयादित्यनेन तत्तु समन्वयादिति अर्थेष्वभिज्ञ इत्यनेन ईक्षतेर्नाशब्दमिति तेने ब्र
ह्म हृदेत्यादिना शास्त्रयोनित्वादिति मुह्यंति यत्सूरय इत्यनेन एतेन सर्वे व्याख्याता व्या
ख्याता इत्येतो न्यायकलापः सूचित इति समन्वयाध्यायो व्याख्यातः तेजोवारिमृदा
मित्यादिना तदनन्यत्वमारंभणशब्दादिभ्य इत्यादिन्यायसूचनादविरोधाध्यायार्थः
धीमहीत्यनेन सहकार्यंतरविधिः प्रक्षेपणात् तृतीयं तद्वतो विध्यादिवदित्यादिन्यायसूचना
त्साधनाध्यायार्थः ३ धाम्ना स्वेन सदा निरस्तकुहकं परं सत्यमिति फलाध्यायार्थः
४ अविद्यातत्कार्यध्वस्त्युपलक्षितपरमानंदरूपावशेषात् एवं सति परमहंससंहितेति
समाख्योपपद्यते परमहंसानां वेदांतवाक्यार्थनिदिध्यासननिष्पन्नत्वात् अत्रत्योपा
ख्यानानां तत्तात्पर्यकत्वात् एवं ध्यायेमेति परस्थाने धीमहीति छांदसप्रयोगात् गायत्री

Indira Gandhi National
Centre for the Arts

१० रूपत्वमस्याः संहितायाः सूचितं तत्सवितुर्वरेण्यमित्यस्यार्थः स्वराडित्यनेन सूचितः धियो यो नः प्र
चोदयादित्यस्यार्थः तेनेब्रह्म हृदेत्यादिना सूचितः तथा च गायत्रीवर्णनिशंज पूर्वेषु संहितेति द
र्शितेत्ल्लक्षणं च श्रीभागवतस्य सूचितं तथा च मत्स्यपुराणे दानप्रस्तावे यत्राधिकृत्य गायत्री
वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतं विदुरिति गायत्र्युपक्रमोऽल्लक्षणत्वेनोक्तः
: एवं च सर्गादीन्यपि दशलक्षणान्यनेन श्लोकेन सूचितानि जन्माद्यस्य यत इत्यनेन सर्गवि
सर्गस्थानानि तृतीयचतुर्थपंचमस्कंधव्युत्पाद्यानि सूचितानि तेनेब्रह्म हृदाय आदि
कवये इत्यनेन भक्तानुग्रहलक्षणं पोषणं षष्ठस्कंधव्युत्पाद्यं मुह्यंति यत्सूरय इत्यनेन
कर्मवासनारूपा ऊतिः सप्तमस्कंधव्युत्पाद्या मन्वंतरेशानुकथाः प्रष्टमनवमस्कंधप्रमे
येस्थानमध्य एवांतर्भवंते तेजोवारिमृदां यथा विनिमय इत्यनेन निरोधो दशस्कंधार्थो
१२ दर्शितः धाम्ना स्वेन सदा निरस्तकुहकमित्यनेन मुक्तिरेकादशस्कंधार्थो दर्शितः सत्यं परमि रामः
त्यनेनाश्रयो द्वादशस्कंधार्थो दर्शितः धीमहीति श्यात्मनेपदेोत्तमपुरुषप्रयोगादधिका १०

रीप्रथमस्कंधार्थः तेनैव च ध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कंधार्थः इति कृत्स्नभा
गवतार्थसूचनं तदेवं व्याख्यानमोपनिषदा रोचयंते सात्वतास्तु वर्णयंति पंचीकृतपंचमहाभू
तोपहितं शुद्धचैतन्यं तदभिमानि विराडंतर्यामिरूपं प्रद्योतनमित्यनिरुद्ध इति चाख्यायते ए ३
वमपंचीकृतपंचमहाभूतोपहितं शुद्धचैतन्यं तदभिमानि हिरण्यगर्भांतर्यामिरूपं अ
नुज्ञातेति प्रद्युम्न इति चाख्यायते एवं स्थूलसूक्ष्मभूतकारणीभूतं यन्मायात्मकमव्या
कृतं तदुपहितं शुद्धचैतन्यं तन्निष्ठचिदाभासोपलक्षितं अनुज्ञेति संकर्षणेति चाख्या
यते अनुपहितं तु शुद्धचैतन्यं सर्वानुस्यूतं सन्मात्रं सर्वसाक्षि परमानंदघनं अवि
कल्प इति वासुदेव इति चाख्यायते संकर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्तत एव उ
पाधिकृतः केवलविशेषण एतच्चैन सिंहतापनीयोत्तरभागे व्याख्यानं स अतोऽनुज्ञात्रनुज्ञाऽवि
कल्पैः स्थूलसूक्ष्मबीजसाक्षिभिरिति बहुकृत्वाभ्यासेन अत्र च वासुदेवः परमात्मा संकर्षणो मा२
जीवः प्रद्युम्नस्तु मनः अनिरुद्धोऽहंकार इति पंचरात्रिकप्रक्रिया नादरणीया तद्वचनविरोधा

Indira Gandhi National
Centre for the Arts

११ श्रुतिविरोधाच्चेत्याद्युत्पसंभवादित्यधिकरणे व्याख्यातं केवलं परमात्मैवानुपहितो वासुदे
वः कारणोपहितः संकर्षणः सूक्ष्मभूतोपहितः प्रद्युम्नः स्थूलभूतोपहितोऽनिरुद्ध इति यथा न
द्याख्यानमेवादरणीयं श्रौतत्वादुपपन्नत्वाच्च एवं स्थिते श्लोकयोजना परं सत्यं वासुदेवा
ख्यं वयं धीमहि उपास्महे ध्यानमत्रोपासनरूपमेवाभिप्रेतं चतुर्व्यूहरचनाया उपासन
र्थत्वात् नन्वनुपहितस्य वासुदेवात्मकमेव श्रोत्रकूपद्वारादिकमिवाविवक्षिततत्तदुपा
धिसंबद्धमाकाशात्मकमेव विवक्षितोपाधिसंबद्धं तु पृथग्व्यपदेशभेदं लभते ननु ताव
तावस्त्वन्यत्वं भवति तथा च तया द्वारा वासुदेवे मनोवृत्तिः कार्येति वक्तुमारभते जन्माद्यस्य
यत इत्यादिना अस्य जगतश्चतुर्दशभुवनस्वजनात्मकस्य ब्रह्माण्डस्य जन्मादिविकारजा
तं यतो भवति तं धीमहीति संबंधः तस्य जगद्विरचनयोग्यतामाह अर्थेष्वभिज्ञ इति ब्रह्मा
ण्डाभिमानि विराड्पेक्षया वैलक्षण्यमाह स्वराडिति ब्रह्माण्डावच्छिन्नचिदाभासो हि वि रामः
राड्जीवः अयं तु तद्बिंबभूतस्तदंतर्यामी स्वयमेव राजत इति स्वराट् बिंबभूतत्वेनान्यान ११

न्ये लत्वात् एवमनिरुद्धमोतमुक्त्वा प्रद्युम्नमनुज्ञातारमाह तेने ब्रह्म हृदा य आदिकवय इति आदिकव
य इति आदिकवये सूक्ष्मभूतावच्छिन्नचिदाभासाय हिरण्यगर्भसूत्रादिसंज्ञकाय जीवाय ब्रह्म वेदं त
दंतर्यामिरूपेण बिंबभूतो यस्तेने तनुते इति हिरण्यगर्भे वेदलक्षणस्य स्पष्टमेवोक्तं संकर्षणरूप
तामाह मुह्यंति यत्सूरय इति। यत्र त्रिगुणात्मकमाया प्रतिबिंबस्य जगत्कारणस्य बिंबभूते सर्वा
तर्यामिणि संकर्षणाख्ये सूरयो [redacted] यिभ्राम्यंति स्थूलसूक्ष्मप्रपंचद्वये भ्रांत्या कल्पयंति प्रधानप
रमाण्वादिरूपेण वा भ्राम्यंति। वासुदेवरूपतामाह तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषे
ति। त्रिविधः सर्गः त्रिसर्गः आध्यात्मिक आधिभौतिक आधिदैविक इति स यत्र मृषा सर्वथा
सन्नित्यर्थः अपन्हववचनोऽत्र मृषाशब्दः त्रयाणां अनिरुद्धप्रद्युम्नसंकर्षणानामधीनां सर्गः संसर्गो
मृषेति वा तदेवमुपहितत्वेऽनुपहितत्वे वा स्वेन धाम्ना सदा निरस्तकुहकं निवृत्ताविद्यातत्कार्यं बिंबभू
तत्वेनोपाधितद्धर्मैरसंस्पृष्टं अत एव परं सत्यं वासुदेवाख्यं ध्यायेमेति निर्गलितोऽर्थः॥ अत्रानिरुद्धपुरु
षावतारो नारायणः प्रलयोदकशायी भुवनकमलभूत इति सविस्तरं मूल एव व्यक्तं भविष्यति। इत
रेषामपि रूपं वक्ष्यते। विस्तरश्चास्याः प्रक्रियाया मोक्षधर्मेषु नारायणीयोपाख्याने तदेतद्व्याख्यानं योग
णिकारैश्चयंते। केवलभक्तिरसिकास्तु केवलवासुदेवावतार श्रीकृष्णमात्रैयत्र परतया योजयंति। सं
कर्षणप्रद्युम्नानिरुद्धानां स्वसमाख्यैवैव पृथगवतीर्णत्वाद्वासुदेवावतार एव श्रीकृष्णः। वा स्वयं ध्याना

Indira Gandhi National
Centre for the Arts

२

१२ घ पाख्यानेषु पितत्वेव प्रतिपाद्यते इहापि कृष्णस्तु भगवान् स्वयमिति तस्मात्तत्परत्वेयेव सर्वाणि पदानि योजनी
यानि तं परं सत्यं वासुदेवात्मकं श्रीकृष्णं वयं ध्यायेमेत्यस्य सर्वप्रेमास्पदत्वेन ध्येयतामाह। जन्माद्यस्य यत इति। य
तः श्रीकृष्णात् यस्मिन् श्रीकृष्णे वा अस्य आद्यस्य रति भावस्य प्रेमाख्यजन्म भवति सर्वेषामिति शेषः। रति भावस्य चा
द्यत्वं। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेति स्थायि भावाः प्रकीर्तिताः इति भरते
नाद्योपात्तः सर्वप्राणिरति विषयत्वं च परमानंद रूपत्वात्। तथा च वक्ष्यति त्रैलोक्यसौभगमिदं च निरीक्ष्य रू
पं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्निति। दृष्टे समस्तावात्मत्वं सर्वप्राणिनां प्रियो भवेति वरोरन्त इतिशा
ति पर्वणि दानधर्मेषु पठ्यते प्रेमाख्यस्य रति भावस्योत्पत्तौ कारणमाह। अन्वयादितरतश्चेति। अन्वयः
सन्निकर्षः इतरो विप्रकर्षः ताभ्यां। तथा च वक्ष्यति। गोपीनां परमानंद आसीद्गोविंद दर्शने क्षणं युगशत
मिव यासां येन विना भवदिति। यर्ह्यंबुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया तत्राब्द
कोटिप्रतिमः क्षणो भवद्रविं विनाक्ष्णोरिव नस्तवाच्युतेति च। तथा सन्निकर्षविप्रकर्षाभ्यां जायमानो रति
भावः स्थायी तद्विषय श्रवण भाव रसालंबनविभाव इत्यर्थः। विस्तरेण चैतद्दृश्यते। ननु तस्मिन् जायमा
नोपि प्रेमो निरर्थकः तेनाज्ञानात् राजादिषु प्रेमाः परिज्ञानेन विपरीत कार्यस्यापि दर्शनादित्यत आह। अ
र्थेष्वभिज्ञ इति। सर्वेष्वर्थेषु मनोवृत्त्यादिरूपेष्वपि सर्वप्रकारेणाज्ञः एवं च सर्वज्ञत्वान्नास्त्य ज्ञानकृतं वैयर्थ्यं। रामः
प्रेमपरिज्ञानेपि तदाश्रयजनोपकारासामर्थ्यमाशंक्याह। स्वराडिति। स्वतंत्रः सर्वशक्तिरित्यर्थः। शक्ति

ह्रासे हि पारतंत्र्यं स्यात्। तथा च न सामर्थ्य कृतं वैयर्थ्यं। ननु गोपालकस्य कथं सर्वज्ञत्वं सर्वशक्तित्वं चेत्यत
आह। तेने ब्रह्म हृदा य आदिकवय इति। आदिकवये ब्रह्मणे वत्साहरणद्वारा स्वरूपजिज्ञासवे ब्रह्म निजस्वरूपं
सत्यज्ञानादिलक्षणं सर्वशक्तिं च। यस्तेने विस्तारितवान् प्रदर्शितवान् तदपि हृदा संकल्पमात्रेणैवेत्यर्थः। त
था च वक्ष्यति। तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधं। वत्सान्सखीनिव पुरा परि
तो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्टेत्यादि। ननु ब्रह्मा स्वयमेव ज्ञानाति सर्वज्ञत्वात् किं तज्ज्ञापनेने
त्याह। मुह्यंति यत्सूरय इति। यत् यत्र श्रीकृष्णस्वरूपे सूरयो ब्रह्मादयोपि मुह्यंति इदमित्थमिति निश्चयं कर्तुं
न शक्नुवंति तन्मायायाः सर्वमोहकत्वात्। तथा च श्रीभगवतोक्तं गीतासु नाहं प्रकाशः सर्वस्य योगमायासमावृ
तः मूढोयं नाभिजानाति लोको मामजमव्ययमिति। ब्रह्मणो मोहहेतुत्वं तरं वरं न कारुणिकत्वं च दर्शयति।
तेजोवारि मृदामित्यादिना। ब्रह्मणा वत्सेषु तत्पालकेषु तदुपकरणशिक्यादिषु च स्वस्वरूपेषु भौतिकेष्वपहृते
षु यत्र श्रीकृष्णे विसर्गस्त्रयाणां वत्सतत्पालकतदुपकरणादीनां सर्गः प्रादुर्भावो जात इति शेषः। तत्र दृष्टांतः
तेजोवारिमृदां विनिमयो यथेति त्रिवृत्कृत स्तन्ने तरस्तो यथा ब्रह्मणा कृतो वत्सतत्पालकतदुपकरण स्व
रूपः सर्गः तथैव भगवता कृतः सन्निधानं दृश्यत्वेनाभौतिकोपि भौतिकवद्दृश्यत इत्यर्थः। तथा च वक्ष्यते। एव
मेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः। सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचनेति। तथा च केन स्रष्टा भौति यार
काः के च भगवता स्रष्टा अभौतिका इति निर्णयासामर्थ्याच्च ब्रह्मणो मोहायुक्त इत्यर्थः। ननु भगवताकि

Indira Gandhi National
Centre for the Arts

२

१३ मित्यन्येसख्यावृत्सराणांकृत्तानामेवानेतुंशक्यत्वादित्यतआह।मयेति।सर्वेषांमया सहिसुतारूपासमेत्यर्थः।तथा
चवक्ष्यति।ततः कृष्णोमुदंकर्त्तुंतन्मातॄणांचकस्यच।उभयायितमात्मानंचक्रेविश्वकृदीश्वरइतितेषामानयनेवृत्स
राणांसंतोषः।तदन्येषांतत्तुल्यानांकरणेतद्धूनांसंतोषमितिविचार्यपरमकारुणिकेनभगवतान्येसृष्टाइत्यर्थः
ननुमहामायेनवृत्सरणाविहितांमायांकथंकृष्णोज्ञातवान् ज्ञात्वाचकिमितिसोढवान् एतादृशेपराधेकोपस्या
चितत्वादित्याशंक्याह।धाम्नास्वेनसदानिरस्तकुहकमिति।निरस्तंनिराकृतंकुहकंकपटंवृत्सरणाकृतंमोहनंत
न्निमित्तकोपादिकंचयेनेतितथातं।तत्रहेतुर्धाम्नास्वेनसदेति स्वरूपेणात्मतत्त्वेनज्ञानरूपेणाप्रमुत्वेनसर्वनियामक
त्वेनसदनंसतत्त्ववस्थानं।स्वेनसदाधाम्नातद्रूपेणाप्रभावेनेत्यर्थः।तथाचांतर्यामित्वात्परिज्ञानं।आत्मत्वाच्च कोधा
भावः इतिसर्वमनवद्यं।एवंचसर्वप्रियत्वेनपरमानंदरूपः सर्वज्ञः सर्वशक्तिः सर्वमोहनः सर्वसुखप्रदः सर्वापराधसहि
ष्णुः सर्वात्मा परमकारुणिकोविदग्धतरश्च श्रीकृष्णोभक्तिरसालंबनत्वेन संपूर्णग्रंथप्रतिपाद्यइतिध्वनितं।विशेष
णाद्वाराविशेष्योपस्थितिंचाऽलंकारिकारोचयंतेतरां।साक्षादनभिधानंविनोदायेत्यलमतिविस्तरेण॥भक्तिरसानुभ
वप्रकारश्चसर्वोप्यस्माभिर्भक्तिरसायनेऽभिहितः अत्राकिपानवक्ष्यते॥ नन्विदंपुराणांनारंभणीयंगतार्थत्वात्।नहि
धर्मज्ञानार्थंवाआत्मतत्त्वज्ञानार्थंउपासनार्थंवास्यात्।तत्रनप्रथमः कल्पः विष्णुपुराणादिनागतार्थत्वात्।नद्वि रामः
तीयः चतुर्लक्षणामीमांसयासिद्धेः।नतृतीयः नारदपंचरात्रादिनागतार्थत्वादित्यतआह॥ धर्मः प्रोज्झितकैतवोत्रप
रमोनिर्मत्सराणांसतांवेद्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनं।श्रीमद्भागवतेमहामुनिकृतेकिंवापरैरीश्वरः स

द्योहृद्यवरुध्यतेऽत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात्।२।अत्रश्रीमद्भागवतेपरमोधर्मःप्रतिपाद्यतइतिशेषः।श्रीमत्त्वंनाना
विधरसव्यंजकमधुरशब्दत्वं।एवंचप्रमेयसाम्येपिनारंभवैयर्थ्यं।धर्मशास्त्रादीनामीदृशश्रीमत्त्वाभावात्।प्रमेय
वैलक्षण्यस्यातिस्फुटत्वाच्चसुतरामवैयर्थ्यमितिभावः।श्रीमतिभागवतेइतिवक्तव्येश्रीमत्त्वविशेषणस्यनित्ययोग
व्यापनायसमासःकृतःविशेषणविनिर्मोकेनाव्यवहारात्।वषट्कर्त्तुःप्रथमभक्षश्चमसइत्यत्रसमासबलेनैवप्र
थमत्वविशिष्टभक्षांतरविधानाभ्युपगमात्।इतिश्रुवाक्यंसमासश्चश्रुतिः।तथाचभागवतप्रतीतिसमयेएवश्रीम
त्वप्रतीतेरुद्देश्यत्वान्नाविमृष्टविधेयांशतादोषः।अत्रप्रतिपाद्यानांश्रवणकीर्त्तनादिलक्षणानांधर्माणांबहुत्वेपि
भगवत्स्वरूपप्राप्तिलक्षणफलैक्यादेकवचनं।तथाचैकफलकोधर्मराशिरत्रप्रतिपाद्यते।कर्मकांडात्मकधर्मशास्त्रे
षुचविचित्रफलानांधर्माणांप्रतिपादनान्नैयोनरूपं।तदेवाभिव्यनक्ति।परमइति।सर्वतः श्रेष्ठइत्यर्थः।तथा
चवक्ष्यति।सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे।अहैतुक्यप्रतिहतायायात्मासंप्रसीदतीति एतेनमन्वादि
धर्मशास्त्रेणगतार्थत्वमुक्तं।तत्रश्रवणंकीर्त्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेद
नमित्यादिभागवतधर्मप्रतिपादनात्।ननुतथापिमहाभारतेनगतार्थत्वं।तथाच।तत्रैवधर्मेचार्थेच
कामेचभरतर्षभ।यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित्इति भागवतधर्माश्चप्रतिपादिताः।अत
सीपुष्पसंकाशंपीतवाससमच्युतं येनमस्यंतिगोविंदंनतेषांविद्यतेभयमित्यादिना।श्रीभगवद्गीता
सुच।श्रद्धावान्भजतेयोमांसमेयुक्ततमोमत इत्यादिनाप्रबंधे।अतआह।प्रोज्झितकैतवइति।कैतवंक

Indira Gandhi National Centre for the Arts

३

१८ परं युधिष्ठिरादिस्वपितृव्याजः। तद्भगवता स्वयं कथितमपि महाभारते ऽस्तिन चात्र कश्चिद्दोषो ऽस्तीति प्राधान्येन
भागवतधर्मवर्णनमित्यर्थः। तथा चोपसंहरिष्यति। कलिमलसंहतिकालनो ऽखिलेशो हरिरितरत्र न गीय
ते ह्यभीक्ष्णं। इह तु पुनर्भगवानशेषमूर्तिः परिपठितो ऽनुपदं कथाप्रसंगैरिति॥ एतच्च सर्वं व्यासनारदसंवादे
स्फुटीभविष्यति प्रकारेण विष्णुपुराणादिगतार्थत्वं सूचयति॥ तत्र हि सर्वात्मना केशवं प्रोक्तं। भागवतधर्मा
णामपि वर्णाश्रमधर्मसापेक्षत्वकथनात्। वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पंथा
नान्यत्तत्तोषकारकमित्यादिना। अत्र तु। त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वो ऽथ पतेत्ततो यदि। यत्र क्व वा भद्रम
भूदमुष्य किं को वार्थ आप्तो ऽभजतां स्वधर्मतः इत्यादिप्रबंधेन भागवतधर्माणामन्यनिरपेक्षत्वप्रतिपादना
त् प्रकर्षेणाकैतमुक्तं। एतच्च। केचित्केवलया भक्त्या वासुदेवपरायणाः। अघं धुन्वंति कात्स्न्येन नीहारमि
व भास्करः इत्यादौ स्फुटीभविष्यति। कैतवमत्र फलाभिसंधिः प्रकारेण मोक्षाभिसंधिरपि वारित इत्यन्ये। तेन महा
भारतादिनागतार्थत्वं परिहर्त्तव्यं। अत्रैव धर्मः प्रोज्झितकैतवइति पदाभ्यां अपेक्षितार्थलाभे परमपदस्य प्रयो
। अत्र परमेत्येकं वा पदं। यस्मिन् धर्मे अत्र पाः निर्द्वंद्वा एव रमंते खेलंति संतथा तथा च वक्ष्यति। शृण्वन् सुभ
द्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनातीत्यादि। नन्वेवं सति भिन्नकर्मत्वापातः। वर्णाश्रमधर्मा राम
नपेक्षत्वादित्याशंक्याह॥ निर्मत्सराणां सतामिति। संतः प्रदुष्टत्वक्षरणाः रागद्वेषादिदोषशून्याः साधवः

तेषामेवायं वर्णाश्रमधर्मनिरपेक्षो भागवतो धर्म इत्यर्थः। तथा च वक्ष्यति। तावत्कर्माणि कुर्वीत न निर्विद्येत
यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते इत्यादि। तथा चेह जन्मनि जन्मांतरे वानुष्ठितैः सुकृतैः
शुद्धसत्वानां कुतो भिन्नकर्मत्वापातः तत्संपादकरागद्वेषराहित्यात्। तथा चाग्रे माफलस्य रागं निषेधं च
वदिष्यति। सर्वे मनः कृष्णपरारविंदयोर्वचांसि वैकुंठगुणानुवर्णने इत्यादि च। समत्वेनैव मात्सर्योऽभाव
सिद्धौ निर्मत्सराणामित्यनेन न सर्वभूतानुकंपया भागवतधर्मे प्रवृत्तिरिति दर्शयति। मत्सरो ऽसूया द्वेषस्य प्र
वोऽवस्था सर्वदोषस्थितिपापिष्ठतरस्य भेदभावस्य भक्तिवत् पृथगपेक्षणीयतां दर्शयिष्यति। सोऽपि वक्ष्यति
भक्तिं तस्मिन्नीशेऽखिलात्मनि। तद्भक्तेषु च सौहार्दं भूतेषु च परां दयामिति। अत एवायं पंथः परमहंसस
हितेति समाख्यायते। सर्वभूताऽभयदानं विना परमहंसत्वाभावात्। एवं स्वरूपतः प्रमेयतो ऽधिकारित
श्चोत्कर्षेण कर्मकांडेनागतार्थत्वमुक्त्वा ज्ञानकांडेनाप्यित्याह॥ वेद्यमित्यादिना। यद्वा सत्त्वं श्रवा
ध्यवस्कृपृथग्मध्लोकोदर्शितं तदत्र ग्रंथे वेद्यं वेदनार्हं सर्वेषामिति शेषः। शिवदमित्यनेन परमानंदरूप
नयातस्य पुरुषार्थत्वं कथितं शिवदं दातिं सर्वस्य इति शिवदं। तथा च श्रुतिः को ह्येवान्यात्कः प्राण्याद्य
देष आकाश आनंदो न स्यादेष ह्येवानंदयतीत्यानंदरूपस्यैव सतः सर्वानंदहेतुत्वं दर्शयति। तापत्र
यं च आध्यात्मिकं ज्वरशोकादि। आधिदैविकं ग्रहावेशादि। आधिभौतिकं शीतोष्णव्याघ्रसर्पादीति। त
स्योन्मूलनं निरवशेषविनाशनं तापत्रयोन्मूलनमित्यनेनसर्वानर्थनिवृत्तिरूपतया सर्वानर्थहंता

Indira Gandhi National Centre for the Arts

१५ नाद्यविद्यायाउच्छेदात्। तथा च श्रुतिः। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। मृत्युमुखात्प्रमुच्यते इत्याद्या। ततः
सर्वानर्थनिवृत्तिः। एवं च यत्परमपुरुषार्थभूतं श्रुत्वा वासुदेवाख्यं चतुर्लक्षणमीमांसया विचार्य्य मुमुक्षु
भिस्त्रैवर्णिकैः परमहंसपरिव्राजकैरेव कथंचिद्दूरनीयं। तदत्र स्त्रीशूद्रादिभिरपि वेदितुं शक्यमिति महानति
शयः। स्त्रीशूद्रादीनां चतुर्लक्षणमीमांसाश्रवणेऽनधिकारस्योक्तत्वात्। मंदमतीनां त्रै
वर्णिकानां तादृशदुरूहतर्कप्रवेशात्। इह तु तादृशरसव्यंजकैरेव शब्दैः कोमलात्तया भूयो भूयः प्रतिपा
दनात्परमश्रेयोत्तमानां सर्वेषां बुद्धवेद्यत्वं युक्तमिति भावः। नन्वेवं सति श्रमिनवकविकाव्यस्यापि ब्रह्म
प्रतिपादकस्य स्त्रीशूद्रादिश्रवणयोग्यत्वेनैतत्तुल्यता स्यादित्याशंक्याह। महामुनिकृत इति। महान् भग
वदवतारत्वात् भगवान्नारायणः स एव मुनिः सततं मननशीलत्वात्। तेनापि नारदोपदेशमासाद्य
रचितमेतत्। तथा चोक्तं। अष्टादशपुराणानां कर्त्ता सत्यवतीसुतः। कृष्णद्वैपायनं व्यासं विद्धि नारायणं
स्वयं इति। इतिहासपुराणं च पंचमो वेद उच्यते इति च। तथा च व्यासकर्तृकमपि वेदसमाख्यानाच्चतुर्लक्ष
णमीमांसतोऽप्युत्कृष्टमेतत्। किमुताश्मिनवकाव्यादित्यर्थः। महामुनिकृते इत्यनेन पाठमात्रादपि म
हत्पुण्यं प्रामाण्यं चाव्याहतमिति सूचितं। एवं ज्ञानकांडेनान्तर्गतार्थत्वमुक्त्वोपासनाकांडेनापि तदाह। किं
वापरैरित्यादिना। परैरेतद्भिन्नैर्नारदपंचरात्रादिभिर्ग्रंथैः किं वेतिकरणसेनं किंचिदपि प्रयोजनमित्यर्थः।
तथा चैतैर्निष्प्रयोजनैः सप्रयोजनस्यास्य कुतो वैयर्थ्यमिति भावः। ननु भगवदुपासनं तेषां प्रयोजनमिति कु

रामः

तो निष्प्रयोजनत्वमित्यत आह। ईश्वर इत्यादिना। ईश्वरः परमात्मा वासुदेवाख्यः प्रथमश्लोकोक्तः। एतद्रूपश्रव
णेच्छावद्भिरपि हृदि अवरुध्यते प्रेमरसनया बध्यते किं पुनः श्रवणपरैः। तदपि न विलंबेन किंतु सद्यः। तत्क्ष
णादिति पदद्वयोपादानमतिशयसूचनाय। ईश्वरः स्वतंत्रः तस्यावरोधनं स्वाधीनतयावस्थापनं। तदपि न वि
स्तृतदेशे किंतु स्वहृदीति अतिसंकुचिते स्थले। तदपि श्रवणेच्छामात्रेणेति कियानतिशयो वक्तुं शक्यः। ततः किं
पंचरात्रादिदेवताकांडसर्वग्रंथानपेक्षितमेव तथा च तदारंभो व्यर्थ इत्यत आह। कृतिभिः कुशलाः रसभावनाचतु
राः तथा च नीरसानां अकृतिनां तदुपादेयमिति ना रंभवैयर्थ्यमिति भावः। अत्र शुश्रूषुभिरिति कृद्योगेन लोका
व्ययनिष्ठाखलर्थतृणामित्यादिना षष्ठीप्रतिषेधात्। कर्मणि द्वितीया प्राप्ता चेत् शुश्रूषुभिरिति वक्तव्ये यत्रेति
तिसप्तमी यथा कथंचिद्विषयतामात्रेणैव वेदफलमिति सूचयति। द्वितीयाप्रयोगे हि कर्तरि प्सितत्तमं कर्मेति पा
णिनिस्मरणादीप्सिततमत्वे सति चेतत्फलमिति भ्रमः स्यात्। एवं च धर्मः प्रोज्झितकैतव इत्यत्र क्रियापदान
भिधानं सर्वप्रकारेणैव धर्मस्य पर्यवसानं सूचयितुं। एवं वेद्यं वास्तवमित्यत्र कर्तृपदानभिधानं अविशेष
णेव सर्वाधिकारसूचनार्थमिति न्यूनपदतानदोषः। एवं चास्मिन्ग्रंथे भगवान्भगवद्भक्तिः तत्साधनीभूतो भा
गवतधर्मः तदनुष्ठातारश्चैवं भागवताः प्रतिपाद्यंत इति ध्वनितं। तथा च सर्वशास्त्रापेक्षयाश्रेष्ठत्वादि
दमेव सर्वदा श्रोतव्यमिति भावः। एवं तावत् प्रथमश्लोकेन शास्त्रार्थस्य परमपुरुषार्थत्वमुक्त्वा द्वितीयश्लोके
न शास्त्र ... स्य परमपुरुषार्थैकनपेक्षसाधनत्वं। शास्त्रमेव परमः पुमर्थ इति तृतीयश्लोकेनाह॥

क्रि

२६ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं। पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावु
काः॥३॥ निगमो वेदः स एव कल्पतरुः वहुशाखत्वात् विशेषपुमर्थप्रदातृत्वाच्च। तस्य फलं सारभूतं कार्यं
भागवतं असाधारण्येन भगवत्प्रतिपादकं पुराणं पुनः पुनर्वेदमालोच्य रचितत्वाद्दूरफलत्वं तस्य। सर्व
वेदार्थस्य रससंग्रहभूतमित्यर्थः। तथाच वक्ष्यति। भगवान्ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्य
वस्यत्कूटस्थो रतिरात्मन्यतो भवदिति। भगवद्भक्तेः सर्ववेदार्थसारत्वात् तत्प्रतिपादकमिदं सर्वतः सा
रभूतं पिबत। संसारतापरूपपिपासोपशांतये श्रवणपुटैः सर्वं हृद्गतं कुरुत हे रसिकाः असाधारण्येन रसव्य
वहर्तारः पुनः कीदृशाः भावकाः विभावानुभावाद्यर्थोपनयनचतुराः। भावुकाइतिपाठे पि स एवार्थः। स्था
पि भावमात्रेण रसिकत्वे पि विभावाद्युपनयनासामर्थ्ये सति स्वादो न स्यात्। विभावाद्युपनयोपि स्था
यिभावे सति भावे व्यर्थ इति विशेषणद्वयेन चातुर्यातिशयो ध्वन्यते। एतादृशरसानास्वादे रसिकत्वं युष्मा
कं व्यर्थमेव स्यादित्यर्थः। ननु फलस्य कथं पानमित्यत आह। रसमिति। त्वगस्थ्यादि त्याज्यांशः सारांशभा
वाद्रसमात्ररूपत्वेन पानसंभव इत्यर्थः। रसत्वे पि माधुर्यातिशयत्वाभावादनास्वाद्यत्वं फलस्येत्यत आह।
अमृतद्रवसंयुतमिति। अमृतं मोक्षः तस्य द्रवो गतिः प्राप्तिस्तत्सहितमिति तु परमार्थः। कल्पतरुफल
स्यामृतत्वादित्वेन प्रसिद्धत्वादमृतद्रवसंयुतत्वं। एतादृशस्यापि सा सान्नपेयत्वमस्तीति रसत्वमुक्तं। रस रामः
त्वेपि माधुर्यातिशयस्वभावेन पेयत्वमितीदमुक्तमिति न पौनरुक्त्यं। नन्वेतद्रसास्वादपरत्वे मोक्षसाधना

दुष्टानासंभवान्मोक्षानुपपत्तिरित्यत आह। आलयमिति। लयो मोक्षस्तमभिव्याप्येत्यर्थः। हेतुत्वान्नस्यैव मोक्षहेतुत्वाद
नायासेन मोक्षः संपन्न इत्यमृतद्रवसंयुतमित्यत्र व्याख्यातं। एतेन व्याध्यादिप्रतिबंधाभावोपि व्याख्यातः जीवन्मुक्ते
स्तदनुपर्यंतेः। ननु कल्पतरुफलं देवभोग्यं कथमस्माभिर्लभ्य मत आह शुकमुखादनु विगलितमिति। अहो इति
अलभ्यलाभोक्तिः। शुकेन मुनिना परिक्षिते उपदिष्टात्तत् श्रुत्वा सूतेन शौनकादिभ्यः कथितं ततो लोके प्रवृत्त
मित्यर्थः। निगमो महानगरस्थानी यो निगमस्तथेति कोशात्। निगमो वाणिजे पुर्यां कोटवेदवणिक्पथेष्विति विश्वः।
तस्य यः कल्पतरुः सुरतरुसदृशः उत्तमवृक्षः आम्रादिस्तस्य फलं रसं परिपक्वतया रसभूयिष्ठं अमृतकल्पेन द्रवे
णसंयुतं भागवते ऐश्वर्यविशेषं संपन्नस्य महीपतेर्भोग्यं शुकस्य पक्षिणो मुखाद्गलितत्वादेव दुरापमपि स
मासादितं आलयं सौहित्यविशेषवशादिंद्रियाणां लयपर्यंतं कश्चित्सुकृती पिबति तद्वदिति। निगमशुकादिव्य
ग्य उपमालंकारः। रसमा। रससंपत्तस्याः आलयमिति। रसमालयमित्येकं वा पदं। निगर्वस्त्क हे रसिकाः भावका-
भागवतं भगवद्विषयं रसं भगवद्भक्त्याख्यं पिबत आस्वादयत। आलयं मनोलयपर्यंतं। भगवद्भक्तिरसस्य
मनोलयहेतुत्वात्। तस्य परममंगलत्वमाह। फलमिति। सर्वसुकृतकर्मफलभूतं। तथाच वक्ष्यति। दानव्रततपो
होमतपस्वाध्यायसंयमैः श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत इति। एतादृशस्यापि प्राप्तौ दृष्टोपायमाह।
निगमकल्पतरोः निगमो भागवताख्यः पंचमो वेदः स एव कल्पतरुः अनेकस्कंधशोभितत्वात् तस्माद्गलितं भा
गवतात्मना महाकाव्येन व्यंजितमित्यर्थः। तस्यैकेन विदूरेणोवरसव्यंजकत्वं दर्शमिति तदर्थं च संविशिनष्टि।
शुकमुखादिति। शुको वादरायणिः मुखं द्वारं यस्य तस्मान्निगमकल्पतरोः शुकपरीक्षित्संवादरूपसंप्रदायप्र

Indira Gandhi National
Centre for the Arts

रतिमंतरेणतन्नरसानुभवो न स्यादित्यर्थः ॥ पुनः कीदृशं अमृतद्रवसंयुतं । अमृतद्रवो द्रव भोग्यारसो मोक्षगतिश्च
नस्याः इति खंडयति निरुपवृत्तां आपारयतीति तथा । भक्तिरसानुभवे स्वर्गमोक्षयोर्वीक्षा अनुदयात् । तथा च ध्रु
व्रुवो वक्ष्यति । या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वम
हिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानात् ॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसा
धिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः प्रपन्नाः ॥ इति च नागपत्नीवचनं ॥ एतादृशः कथम
स्माभिः लभ्यतामत आह ॥ भुवि गलितं । अहो इति भाग्यातिशयोक्तिः ॥ अत्र च भक्तिरसानुभवासाधारण
कारणत्वेन भागवतस्य रसतादात्म्यविवक्षया सामानाधिक रण्यं रसस्य तत्तादात्म्येन भागवताख्यपुरा
णमपि परमः पुमर्थः इति तत्र प्रवर्तयेन पृथक्कृत्य यतितव्यमित्यभिप्रायः ॥ ३ ॥ प्रथमस्कंधाद्यपद्यत्रयस्य
व्याख्या मध्यस्तद्दिनी ॥ श्रीकृष्णायनमः ॥ श्रीमते रामानुजपरमदयालुतमपरमनीधान ॥ श्रीरामायनमः

Indira Gandhi National
Centre for the Arts